**BAL BHARATI PUBLIC SCHOOL, PITAMPURA, DELHI – 110034**
**Class VII – SANSKRIT**

तिथि - **18 जनवरी- 22 जनवरी**

कक्षा – सप्तमी

विषय - संस्कृत

कालान्श - 1

उपविषय - अपठितः गद्यान्शः

सहायक सामग्री - ई पाठ - पाठ्यपुस्तिका

शिक्षण अधिगम - अपठित गद्यान्श को पढकर एकपद , पूर्णवाक्य मे छात्र प्रश्नो के उत्तर देने में सक्षम होंगे |

व्याकरणात्मक प्रश्नो के उत्तर समझने में सक्षम होंगे |

BBPS,PITAMPURA

# अपठित-अवबोधनम्

## अपठित-1

**अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ( अनुच्छेद पढ़कर प्रश्नों के उत्तर दीजिए )।**

सुखवीरः एकः कृषक अस्ति। सः क्षेत्रे हलं कर्षति। वृषौ तस्य सहायकौ स्तः। सः प्रतिदिनं क्षेत्रं गच्छति अतीव परिश्रमेण च कृषिकार्यं करोति। तस्य भार्या पुत्राः च कृषिकार्ये तस्य सहायतां कुर्वन्ति। तस्य भार्या क्षेत्रे भोजनं नयति। सुखवीरः तत्रैव भोजनं खादति तक्रं च पिबति।

**1. एकपदेन उत्तरत। ( एक पद में उत्तर दीजिए। )**

(क) कः कृषकः अस्ति? ..............................

(ख) कृषकस्य सहायकौ कौ स्तः? ..............................

(ग) भार्या क्षेत्रे किं नयति?

(i) जलम् (ii) अन्नम् (iii) भोजनम् (iv) दुग्धम्

(घ) सुखवीरः प्रतिदिनं कुत्र गच्छति?

(i) ग्रामम् (ii) वनम् (iii) सरोवरम् (iv) क्षेत्रम्

**2. पूर्णवाक्येन उत्तरत। ( पूरे वाक्य में उत्तर दजिए। )**

(क) सुखवीरः कथं कृषिकार्यं करोति?

........................................................................................................

(ख) कृषिकार्ये सुखवीरस्य सहायतां के कुर्वन्ति?

........................................................................................................

**3. निर्देशानुसारम् उत्तरत। ( निर्देश के अनुसार उत्तर दीजिए। )**

(क) 'सः क्षेत्रे हलं कर्षति', अत्र कर्तृपदं किम्?

(i) सः (ii) हलं (iii) क्षेत्रे (iv) न किमपि

(ख) 'पत्नी' इत्यस्य पर्यायपदं किम्?

(i) तक्रम् (ii) पुत्री (iii) भार्या (iv) कृषिः

## अपठित-2

**अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ( अनुच्छेद पढ़कर प्रश्नों के उत्तर दीजिए )।**

भारतदेशः अतीव प्राचीनः विशालश्च अस्ति। अस्य संस्कृतिः विश्वे श्रेष्ठतमा वर्तते। वेदानां रचना भारते एव अभवत्। अस्य दर्शनशास्त्रं विश्वस्य श्रेष्ठतमं दर्शनं वर्तते। अनेके ऋषयः, मुनयः कवयः च जीवनस्य रहस्यानि अत्रैव प्रकटितवन्तः। अत्र अनेके महाकवयः, दार्शनिकाः, चिन्तकाः वैज्ञानिकाः, शिल्पिनः चाऽभवन्। अधुनापि एषः विश्वस्य सर्वश्रेष्ठं विशालतमं च लोकतन्त्रं वर्तते। सर्वधर्मसमभावः, सहिष्णुता, उदारतादयः अस्य वैशिष्ट्यानि सन्ति।

**1. एकपदेन उत्तरत। ( एक पद में उत्तर दीजिए। )**

(क) भारतस्य का श्रेष्ठतमा वर्तते? ..............................

(ख) विश्वस्य सर्वश्रेष्ठं लोकतन्त्रं कः अस्ति? ..............................

(ग) जीवनस्य रहस्यानि के प्रकटितवन्तः?

(i) ऋषयः (ii) मुनयः (iii) कवयः (iv) सर्वे

(घ) वेदानां रचना कुत्र अभवत्?

(i) गुहासु (ii) वने (iii) विश्वे (iv) भारते

**2. पूर्णवाक्येन उत्तरत। ( पूरे वाक्य में उत्तर दजिए। )**

(क) भारतदेशः कीदृशः अस्ति?

..............................................................................................................

(ख) भारतस्य वैशिष्ट्यानि कानि-कानि सन्ति?

..............................................................................................................

**3. निर्देशानुसारम् उत्तरत। ( निर्देश के अनुसार उत्तर दीजिए। )**

(क) 'अस्य' इति सर्वनाम कस्मै प्रयुक्तम्?

(i) देशाय (ii) विश्वस्मै (iii) भारताय (iv) संस्कृत्यै

(ख) 'नवीनः' इत्यस्य विलोमपदं किम्? ..............................

(ग) 'संसारस्य' इत्यस्य पर्यायपदं किम्?

(i) अस्य (ii) विश्वस्य (iii) भारतस्य (iv) जीवनस्य

(घ) गद्यांशात् एकम् अव्ययपदं चिनुत। ..............................

## अपठित-3

**अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ( अनुच्छेद पढ़कर प्रश्नों के उत्तर दीजिए )।**

एका किंवदन्ती अस्ति यत् पुरा एकः नृपः आसीत्। तस्य एका विदुषी पुत्री आसीत्। तस्याः नाम विद्योत्तमा आसीत्। अनेके पण्डिताः तया सह शास्त्रार्थम् अकुर्वन् परन्तु ते सर्वे पराजिताः अभवन्। अतः पण्डिताः कपटेन तस्याः विवाहम् एकेन मूर्खेण सह अकारयन्। अनन्तरं यदा सा पत्युः मूर्खतां ज्ञातवती तदा सा दुःखिता सती पतिं स्वभवनात् निष्कासितवती। पत्न्याः अपमानेन दुःखम् अनुभूय सः महाकाल्याः आराधनां कृतवान् तस्याः आशीर्वादेन च विद्वान् अभवत्।

1. **एकपदेन उत्तरत। ( एक पद में उत्तर दीजिए। )**

   (क) नृपस्य पुत्र्याः नाम किम् आसीत्? ..................................

   (ख) पण्डिताः विद्योत्तमायाः विवाहं केन सह अकारयन्? ..................................

   (ग) शास्त्रार्थे के पराजिताः अभवन्? ..................................

   (घ) कालिदासः कस्याः आशीर्वादेन विद्वान् अभवत्? ..................................

2. **पूर्णवाक्येन उत्तरत। ( पूरे वाक्य में उत्तर दजिए। )**

   विद्योत्तमा कदा पतिं गृहात् निष्कासितवती?

   ........................................................................................................................

3. **निर्देशानुसारम् उत्तरत। ( निर्देश के अनुसार उत्तर दीजिए। )**

   (क) 'विदुषी पुत्री' अनयोः विशेषणपदं किम्? ..................................

   (ख) 'सा पत्युः मूर्खताम्' इत्यत्र 'सा' सर्वनाम पदं कस्यै प्रयुक्तम्? ..................................

## अपठित-4

**अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ( अनुच्छेद पढ़कर प्रश्नों के उत्तर दीजिए )।**

खगानां वचनानि श्रुत्वा वानरः अतिक्रुद्धः अभवत्। सः अचिन्तयत् यत् मम अवस्थां विलोक्य खगाः माम् उपहसन्ति। क्रोधेन वानरस्य मुखं रक्तम् अभवत्। सः क्रोधेन वृक्षम् आरुह्य खगानां नीडानि खण्डशः कृत्वा भूमौ अक्षिपत्। वानरस्य एतां मूर्खतां विलोक्य सर्वे खगाः विलापं कुर्वन्तः उदपतन्। सत्यमेव उक्तम्—'उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये।'

1. **एकपदेन उत्तरत। ( एक पद में उत्तर दीजिए। )**

   (क) क्रोधेन वानरस्य मुखं कीदृशम् अभवत्? ..................................

(ख) उपदेशः केषां प्रकोपाय भवति? ..................................

2. पूर्णवाक्येन उत्तरत। ( पूरे वाक्य में उत्तर दजीिए। )

वानरः वृक्षम् आरुह्य किम् अकरोत्?

..............................................................................................................

3. निर्देशानुसारम् उत्तरत। ( निर्देश के अनुसार उत्तर दीजिए। )

(क) 'कृत्वा' इत्यत्र कः प्रत्ययः?

..............................................................................................................

(ख) 'सः अचिन्तयत्'—इत्यत्र 'सः' सर्वनामपदं कस्मै प्रयुक्तम्?

..............................................................................................................

BBPS,PITAM